শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে অযোধ্যাকাণ্ডে

# ॥ চতুরধিকশততমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ চতুরধিকশততমঃ সর্গঃ ॥

## ৱসিষ্ঠেন সহাগচ্ছন্ত্যাঃ কৌসল্যাযা মন্দাকিনীতটে সুমিত্রাদীনাং সমক্ষে দুঃখপূর্ণোদ্গারঃ, সীতারাম লক্ষ্মণকর্তৃকা মাতৄণাং চরণৱন্দনা ৱসিষ্ঠং প্রণম্য শ্রীরামাদীনাং সর্ৱৈঃ সহোপৱেশনম্

ৱসিষ্ঠঃ পুরতঃ কৃৎৱা দারান্ দশরথস্য চ।
অভিচক্রাম তং দেশং রামদর্শনতর্ষিতঃ॥ **2.104.1** ॥

রাজপত্ন্যশ্চ গচ্ছন্ত্যো মন্দং মন্দাকিনীং প্রতি।
দদৃশুস্তত্র তৎ তীর্থং রামলক্ষ্মণসেৱিতম্॥ **2.104.2** ॥

কৌসল্যা বাষ্পপূর্ণেন মুখেন পরিশুষ্যতা।
সুমিত্রামব্রৱীদ্ দীনাং যাশ্চান্যা রাজযোষিতঃ॥ **2.104.3** ॥

ইদং তেষামনাথানাং ক্লিষ্টমক্লিষ্টকর্মণাম্।
ৱনে প্রাক্কলনং তীর্থং যে তে নির্ৱিষযীকৃতাঃ॥ **2.104.4** ॥

ইতঃ সুমিত্রে পুত্রস্তে সদা জলমতন্দ্রিতঃ।
স্ৱযং হরতি সৌমিত্রির্মম পুত্রস্য কারণাৎ॥ **2.104.5** ॥

জঘন্যমপি তে পুত্রঃ কৃতৱান্ ন তু গর্হিতঃ।
ভ্রাতুর্যদর্থরহিতং সর্ৱং তদ্ গর্হিতং গুণৈঃ॥ **2.104.6** ॥

অদ্যাযমপি তে পুত্রঃ ক্লেশানামতথোচিতঃ।
নীচানর্থসমাচারং সজ্জং কর্ম প্রমুঞ্চতু॥ **2.104.7** ॥

দক্ষিণাগ্রেষু দর্ভেষু সা দদর্শ মহীতলে।
পিতুরিঙ্গুদিপিণ্যাকং ন্যস্তমায়তলোচনা॥ **2.104.8**॥

তং ভূমৌ পিতুরার্তেন ন্যস্তং রামেণ ৱীক্ষ্য সা।
উৱাচ দেৱী কৌসল্যা সর্ৱা দশরথস্ত্রিয়ঃ॥ **2.104.9**॥

ইদমিক্ষ্ৱাকুনাথস্য রাঘৱস্য মহাত্মনঃ।
রাঘৱেণ পিতুর্দত্তং পশ্যতৈতদ্ যথাৱিধি॥ **2.104.10**॥

তস্য দেৱসমানস্য পার্থিৱস্য মহাত্মনঃ।
নৈতদৌপয়িকং মন্যে ভুক্তভোগস্য ভোজনম্॥ **2.104.11**॥

চতুরন্তাং মহীং ভুক্ত্বা মহেন্দ্রসদৃশো ভুৱি।
কথমিঙ্গুদিপিণ্যাকং স ভুঙ্ক্তে ৱসুধাধিপঃ॥ **2.104.12**॥

অতো দুঃখতরং লোকে ন কিঞ্চিৎ প্রতিভাতি মে।
যত্র রামঃ পিতুর্দদ্যাদিঙ্গুদীক্ষোদমৃদ্ধিমান্॥ **2.104.13**॥

রামেণেঙ্গুদিপিণ্যাকং পিতুর্দত্তং সমীক্ষ্য মে।
কথং দুঃখেন হৃদয়ং ন স্ফোটতি সহস্রধা॥ **2.104.14**॥

শ্রুতিস্তু খল্ৱিয়ং সত্যা লৌকিকী প্রতিভাতি মে।
যদন্নঃ পুরুষো ভৱতি তদন্নাস্তস্য দেৱতাঃ॥ **2.104.15**॥

এৱমার্তাং সপত্ন্যস্তা জগ্মুরাশ্ৱাস্য তাং তদা।
দদৃশুশ্চাশ্রমে রামং স্ৱর্গচ্যুতমিৱামরম্॥ **2.104.16**॥

তং ভোগৈঃ সম্পরিত্যক্তং রামং সম্প্রেক্ষ্য মাতরঃ।
আর্তা মুমুচুরশ্রূণি সস্ৱরং শোককর্শিতাঃ॥ **2.104.17**॥

তাসাং রামঃ সমুত্থায় জগ্রাহ চরণাম্বুজান্।
মাতৄণাং মনুজৱ্যাঘ্রঃ সর্ৱাসাং সত্যসঙ্গরঃ॥ **2.104.18**॥

তাঃ পাণিভিঃ সুখস্পর্শৈর্মৃদ্বঙ্গুলিতলৈঃ শুভৈঃ।
প্রমমার্জূ রজঃ পৃষ্ঠাদ্ রামস্যাযতলোচনাঃ॥ **2.104.19**॥

সৌমিত্রিরপি তাঃ সর্ব্বা মাতৄঃ সম্প্রেক্ষ্য দুঃখিতঃ।
অভ্যব়াদযদাসক্তং শনৈ রামাদনন্তরম্॥ **2.104.20**॥

যথা রামে তথা তস্মিন্ সর্ব্বা ব়ব়ৃতিরে স্ত্রিযঃ।
ব়ৃত্তিং দশরথাজ্জাতে লক্ষ্মণে শুভলক্ষণে॥ **2.104.21**॥

সীতাপি চরণাংস্তাসামুপসঙ্গৃহ্য দুঃখিতা।
শ্বশ্রূণামশ্রুপূর্ণাক্ষী সম্বভূব়াগ্রতঃ স্থিতা॥ **2.104.22**॥

তাং পরিষ্ব়জ্য দুঃখার্তা মাতা দুহিতরং যথা।
ব়নব়াসকৃতাং দীনাং কৌসল্যা ব়াক্যমব্রতীৎ॥ **2.104.23**॥

ব়ৈদেহরাজন্যসুতা স্নুষা দশরথস্য চ।
রামপত্নী কথং দুঃখং সম্প্রাপ্তা ব়িজনে ব়নে॥ **2.104.24**॥

পদ্মমাতপসন্তপ্তং পরিক্লিষ্টমিব়োৎপলম্।
কাঞ্চনং রজসা ধ্ব়স্তং ক্লিষ্টং চন্দ্রমিব়াম্বুদৈঃ॥ **2.104.25**॥

মুখং তে প্রেক্ষ্য মাং শোকো দহত্যগ্নিরিব়াশ্রযম্।
ভৃশং মনসি ব়ৈদেহি ব়্যসনারণিসম্ভব়ঃ॥ **2.104.26**॥

ব্রুব়ন্ত্যামেব়মার্তাযাং জনন্যাং ভরতাগ্রজঃ।
পাদাব়াসাদ্য জগ্রাহ ব়সিষ্ঠস্য চ রাঘব়ঃ॥ **2.104.27**॥

পুরোহিতস্যাগ্নিসমস্য তস্য ব়ৈ
বৃহস্পতেরিন্দ্র ইব়ামরাধিপঃ।
প্রগৃহ্য পাদৌ সুসমৃদ্ধতেজসঃ
সহৈব় তেনোপব়িব়েশ রাঘব়ঃ॥ **2.104.28**॥

ততো জঘন্যং সহিতৈঃ স্বমন্ত্রিভিঃ
পুরপ্রধানৈশ্চ তথৈৱ সৈনিকৈঃ।
জনেন ধর্মজ্ঞতমেন ধর্মৱা -
নুপোপৱিষ্টো ভরতস্তদাগ্রজম্॥ **2.104.29** ॥

উপোপৱিষ্টস্তু তদাতিৱীর্যৱাং -
স্তপস্বিৱেষেণ সমীক্ষ্য রাঘৱম্।
শ্রিযা জ্ৱলন্তং ভরতঃ কৃতাঞ্জলি -
র্যথা মহেন্দ্রঃ প্রযতঃ প্রজাপতিম্॥ **2.104.30** ॥

কিমেষ ৱাক্যং ভরতোঽদ্য রাঘৱং
প্রণম্য সৎকৃত্য চ সাধু ৱক্ষ্যতি।
ইতীৱ তস্যার্যজনস্য তত্ত্বতো
বভূৱ কৌতূহলমুত্তমং তদা॥ **2.104.31** ॥

স রাঘৱঃ সত্যধৃতিশ্চ লক্ষ্মণো
মহানুভাৱো ভরতশ্চ ধার্মিকঃ।
ৱৃতাঃ সুহৃদ্ভিশ্চ ৱিরেজিরেঽধ্ৱরে
যথা সদস্যৈঃ সহিতাস্ত্রযোঽগ্নযঃ॥ **2.104.32** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
অযোধ্যাকাণ্ডে চতুরধিকশততমঃ সর্গঃ ॥